२कुङ्कुमे शब्दचि० । रक्तचन्दनतुल्यत्वात्तस्य तथात्वम्

**कुचफल** पु० कुचइव फलमस्य । दाडिम्बवृक्षे राजनि० ।

**कुचर** त्रि० कुत्सितं चरति चर–अच् । १परदोषकथनशीले । हेमच० कुत्सिते स्थाने चरति चर–अच् । २दुर्गमदेशगन्तरि "न भीमः कुचरोगरिष्ठाः" ऋ० १, १५४,२, "कुचरः कुत्सितहिंसाकर्त्ता दुर्गमदेशगन्ता वा" भा० कौ चरति चर–ट । ३भूमिचरे त्रि० । स्त्रियां ङीप्

**कुचाग्र** पु० ६त० । चूचुके कुचयोरग्रभागे अमरः ।

**कुचाङ्गेरी** स्त्री–कुत्सिता चाङ्गेरी । (चुकपालङ्) चुक्रे शाकभेदे रत्नमा० चुक्रशब्दे गुणादि

**कुचिक** पुंस्त्री० कुच–वा० इकन् । (कुँचिया)मत्स्यभेदे स्त्रियां जातित्वात् ङीष् । वृह०सं०कूर्म्मविभागे ऐशान्यामुक्ते देशभेदे "भल्लापल्लोलजटासुरकुनठखसघोषकुचिकाख्याः" ।

**कुचित** त्रि० कुच–क्तिच् । परिमिते उज्ज्वलदत्तः ।

**कुचेल** त्रि० कुत्सितं चेलं वस्त्रमस्य । कुत्सितवस्त्रधरे । कुचा सङ्कुचा इला यस्याः ५त० । २विद्धकर्ण्याम् ३पाठायाम् स्त्री मेदि० गौरा० ङीष् । (आकनादी) ४वृक्षे स्त्री रत्नमा० ।

**कुच्छ** न कु+छो–क । कुमुदे शब्दच० ।

**कुज** स्तेये भ्वा० पर० सक० सेट् । कोजति अकोजीत् चुकोज उदित् कुजित्वा कुक्त्वा । प्रनिकुजति

**कुज** पु० कोः पृथिव्या जायते जन–ड । मङ्गलग्रहे यथा च तस्य तज्जातत्वं तथा आवनेयशब्दे काशीखण्डवाक्येन दर्शितम् २नरकासुरे तस्य वाराहीरूपायाः पृथिव्याउत्पन्नत्वात् तथात्वम् तत्कथा कालिकापुराणे ३६अ० यथा "यथा स नरकोजातो धरागर्भे महासुरः । रजस्वलाया गोत्रायागर्भे वीर्य्येण पोत्रिणः (वराहस्य) । यतोजातस्ततोभूतो देवपुत्रोऽपि सोऽसुरः" इत्युपक्रम्य "गर्भसंस्थं महावीर्य्यं ज्ञात्वा ब्रह्मादयः सुराः । गर्भएव तदा देवशक्त्या दध्रुश्चिरं दृढम् । यथाकालेऽपि संप्राप्ते नो गर्भाज्जायते स च । ततस्त्यक्तशरीरस्तु वराहस्तनयैः सह । अतीव शोकसन्तप्ता जगद्धात्र्यभवत् क्षितिः । शोकाकुला सा व्यलपच्चिरकालं मुहुर्मुहुः । प्रकृतिस्था क्षितिर्भूता माधवेन प्रबोधिता । ततः कालेऽपि संप्राप्ते देवशक्त्या यदा धृतः। न गर्भः प्रसवं याति तदाऽभूत् पीडिता मही । कठोरगर्भा सा देवी गर्भभारं न चाशकत्। यदा वोढुं, तदा देवं माधवं शरणं गता । शरण्यं शरणं गत्वा माधवं जगतां पतिम् । प्रणम्य शिरसा देवी वाक्यमेतदुवाच ह" । स्तवप्रसन्नमाधवोक्तिधराप्रत्युक्तिभ्यां त्रेतायुगादौ तदुत्पत्तिकथा– "इति स्तुतो हृषीकेशोजगद्धात्र्या तदा हरिः । प्रादुर्भूतस्तदा प्राह धरित्रीं दीनमानसाम् । श्रीभगवानुवाच । कथं दीनमना देवि ! धरित्रि ! परिदेवसे। तव वा किङ्कृता पीडा वेत्तुमिच्छामि तदहम् । सुखन्ते परिशुष्कन्तु शरीरं कान्तिवर्जितम् । आकुलं नयनद्वन्द्वं भ्रूविभ्रमविवर्जितम् । ईदृशन्तव रूपन्तु दृष्टपूर्व्वं कदा च न । रूपस्य तु विपर्य्यासे दुःखे वीजञ्च भाषय । एतच्छ्रुत्वा वचस्तस्य माधवस्य जगत्पतेः । विनयावनता देवी पृथ्वी प्राह सगद्गदम् । पृथिव्युवाच । गर्भभारं न संवोढुं माधवाहं क्षमाऽधुना । भृशं नित्यं विषीदामि तन्मात्त्वं त्रातुमर्हसि । त्वया वराहरूपेण मलिनी (ऋतुमती)कामिता पुरा । तेन कामेन कुक्षौ मे स्थगं गर्भोऽयमास्थितः । काले प्राप्ते स गर्भोऽयं न प्रच्यवति माधव ! । कठोरगर्भा तेनाहं पीडितास्मि दिने दिने । यदि न त्रासि मां देव ! गर्भदुःखाज्जगतपते ! । न चिरादेव यास्यामि मृत्योर्वशमसंशयम् । कदापि नेदृशोगर्भो धृतोमाधव ! वै पुरा । योऽचलां चालयति मां सरसीमिव कुञ्जरः । एतच्छ्रुत्वा वचस्तस्याः पृथिव्याः पृथिवीपतिः । आह्लादयन् प्रत्युवाच हरिस्तप्तां लतामिव । श्रीभगवानुवाच । न धरे ते महादुःखं चिरस्थायि भविष्यति । शृणु येन प्रकारेण चानुभूतमिदं त्वया । मलिन्या सह सङ्गेन यो गर्भः संधृतस्त्वया । सोऽभूदसुरसत्वस्तु दृष्टेः(वराहस्य) सुतस्तु दारुणः । ज्ञात्वा तस्य च वृत्तान्तं गर्भस्य द्रुहिणादयः । देवीभिः शक्तिभिः सुभ्रू स्तव कुक्षौ सुतं खरम् । सर्गादौ यदि जायेत भवत्यास्तादृशः सुतः । भ्रंशयेत् सकलाल्लोकांस्त्रीनिमान् ससुरासुरान् । अतस्तस्य बलं वीर्य्यं ज्ञात्वा ब्रह्मादयः सुराः । प्राक्सृष्टिकाले ते गर्भं तदाऽधुर्जगतांकृते । अष्टाविंशतिमे प्राप्ते आदिसर्गाच्चतुर्युगे । त्रेतायुगस्य मध्ये तु सुतं त्वं जनयिष्यसि । यावत् सत्ययुगं याति त्रेतार्द्धञ्च वरानने ! । तावद्वह महागर्भं इत्तः कालोमया तव । न यावज्जायते धात्रि ! गर्भस्ते ह्यतिदारुणः । तावद्गर्भवती दुःखं न त्वं प्राप्स्यसि भाविनि !" "ये च प्रलम्बखरदर्दुररिष्टमुष्टिकमल्लभक्तंसयवनाः कुजपौण्ड्रकाद्याः" भाग० २,७,३६ । "तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्त्तबन्धुम्" भाग०३,३,८श्लो० । "कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम् "ज्यो०" मङ्गलग्रहस्य चारादिकमङ्गारकशब्दे ७६पृ० उक्तम् । कल्ये